# महाभारते आयुर्वेदस्य प्रयोगः

**अमरेन्द्र कुमार मिश्रः**
**सहाचार्य (साहित्य विभागः)**
**कालियाचक विक्रमकिशोर आदर्श संस्कृत महाविद्यालयः**
**पूर्वमेदिनीपुरं, पश्चिमबङ्गः**

**महाभारतम्** —

निखिलस्य जगतः प्राणभूताः अध्यात्मग्रन्थाः सन्ति तेषु अन्यतमः महाभारतनामको ग्रन्थोऽपि विद्यते । भारतस्य मनीषिभिः दीर्घकालिकीपरम्परातः सुचिन्तितायाः जीवनधारायाः सर्वाङ्गीणव्याख्यायाः सर्वोत्कृष्टः प्रतिनिधिग्रन्थो महाभारतं वर्तते । महाभारतमेव ग्रन्थः वेदविज्ञानस्य, पुराणसाहित्यस्य, इतिहासस्य, महाकाव्यस्य, धर्मग्रन्थस्य, सामाजिकसांस्कृतिकचेतनायाश्च प्रतिनिधिग्रन्थो वर्तते व्यासेन महाभारते सर्वेषां वेदापवेदानां वेदाङ्गानाम्, उपनिषदाम्, इतिहासपुराणां न्याय - शिक्षा-चिकित्सानाञ्च साङ्गोपाङ्गविवेचनं विहितम् । महाभारतस्य माहात्म्यं वर्णयन् तद्रचनाकारः व्यासः प्राह आदिपर्वणः द्वितीयेऽध्याये-

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।**

**न चाख्यानमिदं विद्यान्नैव स स्याद् विचक्षणः॥**[२]

अर्थात् यो द्विजः वेदोपनिषदः जानाति परञ्च महाभारतमाख्यानं न जानाति सः विशिष्ट विद्वान् नास्ति । यतोहि अस्मिन् महाभारते अर्थशास्त्रस्य, कामशास्त्रस्य, धर्मशास्त्राणां च चर्चा विहिता । महाभारतस्याध्ययनेन ज्ञायते यत् कौरवपाण्डवानां युद्धव्यतिरिक्तानि बहूनि महार्घाणि रत्नानि महाभारते परिलसन्ति। प्रख्यातो वैयाकरणः पाणिनिः भारतशब्दस्यार्थं युद्धम् अष्टाध्याय्याः संग्रामे प्रयोजनयोद्धृभ्यः 4/2/56 सूत्रेऽलिखत्। अत एव महाभारतशब्दः महासंग्रामस्य बोधको भवति । महाभारतस्यासामान्याः विशेषताः वीक्ष्येदं पञ्चमवेदरूपेण स्मर्यते । महाभारतस्याध्ययनेन ज्ञायते यत् तस्याः कथायाः प्रवचनकर्तारः त्रयः सन्ति । प्रथमः प्रवक्ता कृष्णद्वैपायनो व्यासो वर्तते। सर्वप्रथमं सः कथामिमां वैशम्पायनाख्यं स्वशिष्यं श्रावयामास । जनमेजयस्य नागयज्ञस्यावसरे तां कथां वैशम्पायनः अर्जुनस्य प्रपौत्रं जनमेजयं श्रावयामास । पुनः तृतीयं वारं लोमहर्षणस्य पुत्रः सौतिः पवित्रमिदं महाख्यानं शौनकादिभ्यः ऋषिभ्यः श्रावयामास । शौनकादिभ्यः एवेयं कथा लोकविश्रुता वभूव। महाभारतस्य त्रीणि नामानि समुपलभ्यन्ते । समालोचकानां मतानुसारेण कृष्णद्वैपायनो यां कथां वैशम्पायनं प्रावोचत्

तस्याः नाम जय आसीत् । समालोचकैः निगद्यते यत् द्वैपायनप्रोक्ते जयग्रन्थे ८८०० श्लोकाः आसन्। पुनः यां कथां वैशम्पायनः जनमेजयं प्रावोचत् तस्याः नाम भारतमासीत् । तस्यां भारतसंहितायां २४००० श्लोकसंख्या आसीत् । पुनः यां कथां सौतिः शौनकऋषीन् प्रावोचत् तस्याः संहितायाः नाम महाभारतमासीत्। तत्र श्लोकसंख्या १००००० परिमिताः आसन्।

**आयुर्वेदः—**

महाभारते यत्र तत्र आयुर्वेदस्य ज्ञानं प्राप्यते । महाभारतस्य शान्तिपर्वणः षोडशतमे अध्याये भीमः अर्जुनं प्रति आयुर्वेदविषयकं चिकित्साविषयकं वा संवादं कथयति । हे राजन्! मनुष्यस्य द्विविधो व्याधिः जायते। विविधाः आधयो अस्मात् इति व्याधिः । वि+आङ+पूर्वकधाधातोः 'उपसर्गे घो किः' इति पाणिनिसूत्रेण किप्रत्यये सति व्याधिशब्दो निष्पद्यते ।

**शारीरिकव्याधिः मानसिकव्याधिश्च—**

**द्विविधो जायते व्याधिः शारीरो मानसस्तथा।**

**परस्परं तयोर्जन्म निर्द्वन्द्वं नोपलभ्यते॥**

एतयोः उत्पत्तिः परस्परा आश्रिता वर्तते । एकं विना अपरस्य सम्भावना न भवति । कदाचित् शारीरिकव्याधिना मानसिकव्याधिः उत्पद्यते इति नात्र संशयः । एवं प्रकारेण कदाचिद् मानसिकव्याधिना शरीरिकव्याधिः समुत्पद्यते इति निश्चयः । यो मानवः अतीतं त्रयः शारीरजाः गुणाः भवन्ति । एतेषां गुणानां साम्यावस्था स्वस्थस्वास्थ्यस्य लक्षणं वर्तते । कथितं महाभारते

**शारीराज्जायते व्याधिर्मानसो नात्र संशयः।**

**मानसाज्जायते वापि शारीर इति नात्र संशयः॥**

**शारीरं मानसं दुःखं योऽतीतमनुशोचति।**

**दुःखेन लभते दुःखं द्वानर्थौ च विन्दति॥**

**शीतोष्णे चैव वायुश्च त्रयः शारीरजाः गुणाः।**

**तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणम्॥**[3]

तेषु त्रिषु गुणेषु यदि एकस्यापि वृद्धिः भवति तदा तस्य कृते विधानं भवति यत् उष्णेन शीतं बाध्यते तथा शीतेन उष्णं प्रबाध्यते । सत्त्वं रजस्तमः इति त्रयः मानसिकाः गुणाः भवन्ति । तेषां गुणानां साम्यावस्थायां स्वस्थस्वास्थ्यं भवति । कश्चित् सुखे वर्तमानो दुःखं स्मर्तुमिच्छति । कश्चिद् दुःखे वर्तमानः सुखं स्मर्तुमिच्छति । कल्पारम्भे भगवान् ब्रह्माणं वेदज्ञानं, बृहस्पतिं वेदाङ्गानां ज्ञानं भार्गवं नीतिज्ञानं, नारदं गान्धर्ववेदज्ञानं, भरद्वाजं धनुर्वेद, गार्ग्य च देवर्षिचरितज्ञानं जगाद । नारायणदेव ऋषयः, देवाः राजर्षयः तं ब्रह्म जानन्ति । स ब्रह्मज्ञानमेव समस्तदुःखानां परमम् औषधं वर्तते । कथितं महाभारतस्य शान्तिपर्वणि

**नारायणादृषिगणास्तथा मुख्याः सुरासुराः।**

**राजर्षयः पुराणश्च परमं दुःखभेषजम् ॥**[४]

## राजसभायाम् आयुर्वेदविदः सम्माननम्

महाभारतकालीनसमाजे आयुर्वेदविदां सम्मानं प्रामुख्यं भजते । निदानं, पूर्वलिङ्गम्, उपशयः, सम्प्राप्तिः, औषधिः, रुग्णः, परिचायकानाञ्च भेदेन अष्टाङ्गायुर्वेदविदः चिकित्सकान् राजसभायां विशेष सम्मानपदं प्रदीयते स्म । कालेऽस्मिन् राज्ञां चेष्टासर्वविधानुकूलताकारणेन आयुर्वेदविद्या अतिशयोत्कृष्टतां प्राप्ता । कथितं भीमेन अर्जुनं प्रति सभापर्वणि हे अर्जुन! त्वं नियमेन औषधिसेवनं करोषि न वा । अर्थात् नियतेन औषधिसेवनेन स्वास्थ्यलाभो भवति

**कच्चिद् वैद्याश्चिकित्सायामष्टाङ्गायां विशारदाः।**

**सुहृदश्चानुरक्ताश्च शरीरे ते हिताः सदा॥**[५]

रोगस्य कानिचित् कारणानि भवन्ति । यथा अतिभोजनम्, अभोजनं दूषितान्नं, मद्यपानम्, अतिव्यायामः, अतिकामुकता, मलमूत्रस्य वेगधारणं, रसबहुलद्रव्यानां भोजनं, दिवानिद्रा च शारीरिकरोगाणां हेतवः वर्तन्ते । आश्वमेधिकपर्वणिः सप्तदशेऽध्याये कथितं सिद्धेन सः मानवः सत्त्वं बलम् अनुकूलसमयं विदित्वाऽपि मनसि अधिकारात् न कालविरुद्ध : भोजनं करोति । येन वस्तुना अधिका: हानयः भवन्ति तानि वस्तून्येव सेवते -

**यदायमतिकष्टानि सर्वाण्युपनिषेवते ।**

**अत्यर्थमपि वा भुङ्क्ते न वा भुङ्क्ते कदाचन॥**[६]

कदाचिद् अधिकान्नं खादति, कदाचिद् किमपि न खादति, कदाचिद् दूषितं खाद्यम् अन्नपानादीनां ग्रहणमपि करोति । यस्मिन् कस्मिन् दिने गरिष्ठान्नं करोति, यदा कदा व्यायामस्य अधिकम् अभ्यासं कुरुते, कदाचिद् अधिकं स्त्रीसम्भोगं करोति, यदा कदा अधिक रसाभियुक्तमन्नं खादति दिवा स्वप्नञ्च सेवते। येन शरीरे दोषाः आयान्ति । अतः मानवस्यापेक्षते शास्त्रोक्तरीत्या भोजनस्य, व्यायामादीनां सेवनं कर्त्तव्यमिति । आयुर्वेदानुसारेण व्रतं ब्रह्मचर्यम्, इन्द्रियनिग्रहः शान्तिः शुभाशुभकार्याणि कर्त्तव्यानि ।

**गुणा दश स्नानशीलं भजन्ते बलं रूपं स्वरवर्णप्रशुद्धिः।**

**स्पर्शश्च गन्धश्च विशुद्धता च श्रीसौकुमार्यं प्रवराश्च नार्यः॥**[७]

अर्थात् यः परिमितानि भोजनस्नानादिकार्याणि करोति सः आयुः आरोग्यं बलं सुखञ्चादीनि प्राप्नोति। केशप्रसाधनम्, अञ्जनं दन्तधावनादीनि कार्याणि पूर्वी एव कर्त्तव्यानि। अनुशासनपर्वणः अष्टनवतितमेऽध्याये लता - औषधिविषयकं संवादः भवति बलिशुक्राचार्ययोर्मध्ये । शुक्राचार्यः वदति यत् सर्वप्रथमं तपस्यायाः उत्पत्तिः जाता, अनन्तरं धर्मस्य। ततः परं लता - औषधीनां प्रादुर्भावः अभवत्। अस्मिन् पृथिवीतले बहुधा सोमलता सम्भूता । अमृतं सः अस्ति यः सद्यो मनसः प्रीतिं ददाति।

पथ्यद्रव्यं विहाय अपथ्यद्रव्यस्य सेवनं करोति सः आरोग्यवान् न भवति। यः मनुष्यः प्रतिदिनं तिक्तं, कषायं मधुरादिरसान् स्वीकरोति तस्य स्वास्थं सुकरं भवति । खाद्यवस्तु स्वास्थ्यरक्षायाः मुख्योपायो वर्तते। उक्तञ्च शान्तिपर्वणि

**पथ्यं भुक्त्वा तु यो मोहादुष्णमश्नाति भोजनम्।**

**परिणाममविज्ञाय तदन्तं तस्य जीवितम्॥**[८]

तत्र आयुर्वेदमभिलक्ष्य महाभारते भोजननियमावल्याः वर्णनं प्राप्यते । मौनव्रताचारः भोजनसमये कर्तव्यमः इत्यपि प्राप्यते । यथा अनुशासनपर्वणि आयाति

**वाग्यतो नैकवस्त्रश्च नासंविष्टः कदाचन।**

**भूमौ सदैव नाश्नीयान्नानासीनो न शब्दवत्॥**[९]

अर्थात् भोजनसमये मौनं स्थातव्यम् । एकमेव वस्त्रं धारयित्वा शयनं कृत्वा च भोजनं कदापि न कर्त्तव्यम् इत्यादिरूपेण भोजननियमावलीसन्दर्भे बहुधा प्रपञ्चितम् एतेषामुद्दिश्यं स्वास्थ्यरक्षणमेव । अपि च

**अन्नं बुभुक्षमाणस्तु त्रिमुखेन स्पृशेदपः।**

**भुक्त्वा चान्नं तथैव त्रिर्द्भिः पुनः परिमार्जयेत्॥**[१०]

महाभारते रोगाणां चर्चा वर्तते। तेषां निदानोपायाः अपि निरूपिताः । तस्मिन्नेव क्रमे ज्वरोत्पत्तिविषये उल्लेखो मिलति। ज्वरेण शरीरे उत्पन्ना या दुर्बलता तस्याः कारणेन वृत्रासुरस्य हननं जातम्। श्रूयते यत् मेरुपर्वते ज्योतिष्कनामकः एकः शिखरः आसीत् । सः शिखरः नानाविधरत्नानि विभूषितः एवं सर्वजनपूजितश्च आसीत्। एकदा हरपार्वत्यौ शिखरे उपविश्य प्रेमालापे मग्नौ आस्ताम् । तत्समये अष्टवसुः अश्विनीकुमारी, कुबेरादयः देवताः, सनत्कुमारः, आदि ऋषयः समाविष्टाः । तयोः चरणवन्दनं सर्वैः विहितम् । तदनन्तरं सर्वे देवाः ऋषिगणाश्च दक्षद्वारा आयोजिते अश्वमेधयज्ञे प्रतिभागकरणाय गङ्गाद्वारे गतवन्तः । पार्वतीद्वारा पृष्टव्ये प्रश्ने महादेवेन प्रत्युत्तररूपेण तेषां गमनस्य कारणम् उपपादितम्। यज्ञस्य निमन्त्रणं महादेवः न प्राप्तवान् इति ज्ञात्वा पार्वती दुःखयति स्म । सा तूष्णीमुपविश्य चिन्तयति स्म एवञ्च तस्याः हृदये ज्वाला ज्वलयति। पार्वत्याः क्लेशदूरीकरणाय महादेवेन नन्द्यादिभीषणकाययुक्तान् अनुचरान् प्रेषयित्वा यज्ञविनाशनं कारितम्। क्रोधवशात् भगवतो महादेवस्य ललाटात् स्वेदः भूमौ पतितः । स्वेदबिन्दूतः कालानलस्येव महाग्नेः प्रादुर्भावः जातः । अग्निभ्यः ह्रस्वः रक्ताक्षः, ऊर्ध्वकेशी, कृष्णवर्णः, रक्तवासः इत्येवमीदृशः भयङ्करमूर्तेः आविर्भावः जातः । तं मूर्तिं दृष्ट्वा सर्वे भयभीताः सञ्जाताः । तदन्तरं ब्रह्मा शिवसमक्षं गत्वा वचनं दत्तवान् यत् भविष्ये सम्पाद्यमाने यज्ञे तस्य नाम्ना विशेषाहुतिं दास्यन्ति सर्वे । भगवतो महादेवस्य क्रोधाग्निना उत्पन्नः सम्पाद्यमाने यज्ञे तस्य नाम ज्वरः इति निगदितम् । देवानां स्तुत्या प्रसन्नेन सता महादेवेन ज्वरं सर्वत्र स्थापयितुं निर्दिष्टम् । तत्कालादेव ज्वरस्य प्रभावः सर्वत्र विद्यमानो वर्तते । तत्र रोगादीनां निवारणाय शान्तिस्वस्त्ययन मन्त्रपाठादीनां निरूपणमपि महाभारते प्राप्यते । उक्तञ्च वनपर्वणि

**ते समाश्वासयामासुराशीर्भिश्चाप्यपूजयन्।**

**रक्षोघ्नांश्च तथा मन्त्रोपुश्चक्रुश्च क्रिया॥**[११]

संसारस्य अनित्यतायाः भवितव्यस्य अवश्यम्भावितायां व्यासः युधिष्ठिरं बहुत्र स्थलेषु उपदिष्टवान् यत् आयुर्वेदस्य विशेषज्ञः वैद्योऽपि रोगपीडितो भूत्वा कष्टमनुभूय स्वजीवनं यापयन्ति स्म यापयन्ति यापयिष्यन्ति च। विविधकषायं घृतादीनां पानं कृत्वापि मृत्युं तर्तुं ते न पारयन्ति तथा केऽपि न पारयन्ति । रसायनज्ञाः स्वास्थ्यरक्षणनिमित्ताय बहुविधानां रसायनानां पानं कुर्वन्तिं तदपि जराग्रस्तो भूत्वा कष्टमनुभवन्ति । उक्तञ्च शान्तिपर्वणि

**आयुर्वेदमधीयानाः केवलं सपरिग्रहाः।**

**दृश्यन्ते बहवो वैद्या व्याधिभिः समभिप्लुताः॥**[१२]

निष्कर्ष: - अतः स्वास्थ्यरक्षायै सत्त्वादिगुणानां सामान्यनियमानां नियमपूर्वकनिमित्तप्रसाधनादीनां च पालनं करणीयम्। परिमितभोजनादीनां पालनं कर्तव्यमेव । अत एवोक्तम्- शरीरमाद्यं खलु सर्वसाधनमिति।

## पादटिप्पण्यः

१. पद्मपुराणम् – १।२।५२.
२. महाभारतम्, आदिपर्व - २
३. महाभारतम्, शान्तिपर्व- १६।११
४. तत्रैव २१०/२४
५. महाभारतम्, सभापर्व - ५/९१
६. महाभारतम्, आश्व० पर्व - १७ / ९
७. महाभारतम्, उद्योगपर्व - ३७/३३
८. महाभारतम्, शान्तिपर्व- १३९/८०.
९. महाभारतम्, अनुशासनपर्व- १०४/९५
१०. महाभारतम्, अनुशासनपर्व- १०४ / ५५
११. महाभारतम्, वनपर्व - १४४ / १६
१२. महाभारतम्, शान्तिपर्व - २८/४५

सन्दर्भग्रन्थसूची—

- महाभारतम् (वेदव्यासविरचितम्); (भारतकौमुदीटीकासहिता) (आदिपर्वः, प्रथमखण्डः) ; अनु. हरिदाससिद्धान्तवागीश-भट्टाचार्य्यः,संख्यकसूरिवर्त्मस्थसिद्धान्तविद्यालयः,कोलकाता, १३४६ वङ्गाव्दः।
- महाभारतम् (वेदव्यासविरचितम्) ; अनु. राजशेखरवसु , एम.सि.सरकार एण्ड सन्स, लिमिटेड् , कोलकाता , १३५६ वङ्गाब्द ।
- महाभारतम् (श्रीकृष्णद्वैपायनवेदव्यासविरचितम्) ; सम्पा. हरिदाससिद्धान्तवागीशः, विश्ववाणीप्रकाशन, कोलकाता, १३८३ वङ्गाब्दः (द्वितीयसंस्करणम्)
- अभेदानन्द, अथर्ववेद, दिल्ली : परिमल पावलिकेशन, १९९४।
- आब्दुल आजीज आमान (सम्पा.), अथर्ववेद, कलकाताः हरफ्, १३८५।